# Shri Dikshita Navaratnamalika

# શ્રીદીક્ષિતનવરત્નમાલિકા

## Document Information

Text title : Dikshita Navaratnamalika

File name : dIkShitanavaratnamAlikA.itx

Category : deities_misc, nava, gurudev

Location : doc_deities_misc

Description/comments : Nine verses praising Appayya Dixit

Latest update : January 21, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2022

*sanskritdocuments.org*

# શ્રીદીક્ષિતનવરત્નમાલિકા

અસ્મદ્વંશાવતંસાધ્વરિવરરચિતા યે પ્રવન્ધાઃ પ્રથન્તે
    દેશે દેશે વિદુષ્યત્યતિમુષિતબૃહન્મોહસન્દોહવૃન્દાઃ ।
તેષામર્થં યથાવત્કતિચનકૃતિનઃ સર્વતન્ત્રૈકવેદ્યં
    ધન્યાસ્સંવિદ્રતે તાન્ શરણયતુ જનો ઘોરસંસારભીરુઃ ॥ ૧॥

મૂર્ધન્યત્વેન મીમાંસકવરનિકરે યે સ્તુતાઃ કૌસ્તુભેઽપિ
    શ્રીમન્તો યત્પ્રબન્ધાઃ શતમિહ વિદુષાં વૃન્દમાનન્દયન્તિ ।
અન્યાનાઘ્રાતયુક્તિપ્રચયઘટનયાધ્વંસિતં મધ્વતન્ત્રં
    નાનોદાહારયુક્ત્યાસ્ત્રિવિધવિધિભિદા યૈઃ સ્ફુટં જ્ઞાપિતા નઃ ॥ ૨॥

આત્મજ્ઞાનં વિમુક્તેર્ગમકમિતિ તદભ્યર્થિનાં સદ્યતીનાં
    સદ્યો મુક્તેરવાપ્ત્યૈ વ્યરચિ પરિમલો ન્યાય રક્ષામણિશ્ચ ।
કેષાઞ્ચિત્ પ્રેમ લક્ષ્મીપતિ સદનગતૌ વીક્ષ્ય તલ્લક્ષ્મણાર્યા-
    ધાકૂતવ્યઞ્જિકા સાપ્યકથિ નયમયૂખાદિમાલા વિશાલા ॥ ૩॥

માધ્વે તન્ત્રેઽપિ તિષ્ઠન્ મધુમથનસદારાધનોભૃતપુણ્યૈઃ
    શુદ્ધાત્મા શ્રદ્દધીત શ્રુતિમકુટગતે બ્રહ્મણિ ત્વાત્મભૂતે ।
ઇત્યાલોચ્ય સ્વયં તદ્વિહતમપિ મતં રક્ષિતું ગ્રન્થભેદે
    માધ્વાનાં યૈઃ પ્રણીતા પરમહિતકરી ન્યાયમુક્તાવલીસા ॥ ૪॥

તેષાં પાદાબ્જરેણુસ્મરણમલમઘૌઘસ્ય વિધ્વસ્તયે નઃ
    પુણ્યૌઘસ્યોપચિત્યૈ ન તદુભયજુષાં કિઞ્ચિદન્યદ્વ્યપેક્ષ્યમ્ ।
પ્રાયો લોકોપકારપ્રવણિતમનસઃ સ્વાન્વયે જન્મભાજ
    તે માં રક્ષન્તુ ભીતં ભવદવદહનાત્સમ્પ્રસાદ્યામ્બિકેશમ્ ॥ ૫॥

યત્પ્રોચે શમ્ભુભક્તિ વિઘટયિતુમલં તત્ત્વમુક્તાકલાપે
    પ્રત્યૂચે તચ્છ્રુતીનાં નયયુતવિવૃતેઃ શૈવકર્ણામૃતાદૌ ।
શ્રીકણ્ઠાર્યોક્તિમૂલં પરમતમપિ નોન્મૂલિતં તત્ર ભાવાત્
    કોઽન્યઃ શક્તો ભુવિ સ્યાન્મખિકુલતિલકાત્ સર્વલોકોપકૃત્યૈ ॥ ૬॥

સાર્વજ્ઞં વીક્ષ્ય યેષાં પ્રથિતકવિવરૈઃ સાર્વભૌમઃ શશંસે
યેષામાશીગિરાભૂદખિલકુશલભાઙ નીલકણ્ટાધ્વરીન્દ્રઃ ।
યેષાં તાદાત્વિકેભ્યઃ કિલ સકલકલાવલ્લભત્વં બુધેભ્યઃ
સર્વેભ્યોભ્યહિતં દ્રાગભવદિતિ સમાકર્ણયે વર્ણયે કિમ્ ॥ ૭॥

પ્રબન્ધ શતનિર્મિતિઃ પ્રથિતમગ્નિહોત્રાદિકં
શ્રુતપ્રવચતાદયઃ શ્રિતજનાવનાર્થં પ્રભોઃ ।
સભાં પ્રતિ ગતાગતં સમુદિતં મખીન્દ્રોષુ નઃ
કિયત્યલસતા સતામપિ તતઃ પરોષાં ભુવિ ॥ ૮॥

શઙ્કરભગવત્પાદાચાર્યાસ્ત્વદ્વૈતમાર્ગમિવ ।
યે પ્રત્યતિષ્ઠાપયન્ ભુવિ શિવ ભક્તિપથં કથં ન તે વન્દ્યાઃ ॥ ૯॥

નવરત્નમાલિકૈષા મખિરાજચરિતમ મઞ્જૂષા ।
દુરિતૌઘતિમિરપૂષા યોષાર્ધતનોસ્તનોતુ પરિતોષમ્ ॥ ૧૦॥

શ્રી ત્યાગરાજમખિ વિરચિતા શ્રીદીક્ષિત નવરત્નમાલિકા સમાપ્તા ।

*Shri Dikshita Navaratnamalika*

pdf was typeset on January 21, 2022

Please send corrections to *sanskrit@cheerful.com*